## स्वामीश्वराधिपतिदायादसाक्षिप्रतिभूप्रसूतैश्च । (३९/६३६)

[1]षष्ठीसप्तम्यौ वर्तेते । स्वामिन् ईश्वर [2]अधिपति दायाद साक्षिन् प्रतिभू प्रसूत इत्येतैर्योगे षष्ठीसप्तम्यौ विभक्ती भवतः । गवां स्वामी, गोषु स्वामी । गवामीश्वरः, गोष्वीश्वरः । गवामधिपतिः, गोष्वधिपतिः । गवां दायादः, गोषु दायादः । गवां साक्षी, गोषु साक्षी । गवां प्रतिभूः, गोषु प्रतिभूः । गवां प्रसूतः, गोषु प्रसूतः । षष्ठ्यामेव प्राप्तायां पक्षे सप्तमीविधानार्थं वचनम्[3] ॥

## आयुक्तकुशलाभ्यां चासेवायाम् । (४०/६३७)

षष्ठीसप्तम्यौ वर्तेते । आयुक्तः [4]व्यापारितः, कुशलः निपुणः, ताभ्यां योगे आसेवायां गम्यमानायां षष्ठीसप्तम्यौ विभक्ती भवतः । आसेवा तात्पर्यम् । आयुक्तः [5]कटकरणस्य, आयुक्तः [6]कटकरणे । कुशलः [7]कटकरणस्य, कुशलः [8]कटकरणे । आसेवायाम् इति किम्? आयुक्तो गौः शकटे । तत्र सप्तम्येवाधिकरणे भवति ॥

## यतश्च निर्धारणम् (४१/६३८)

षष्ठीसप्तम्यौ वर्तेते । जातिगुणक्रियाभिः समुदायादेकदेशस्य पृथक्करणं निर्धारणम् । यतो [9]निर्धारणं ततः षष्ठीसप्तम्यौ विभक्ती भवतः । मनुष्याणां क्षत्रियः शूरतमः, मनुष्येषु क्षत्रियः शूरतमः । गवां कृष्णा सम्पन्नक्षीरतमा, गोषु कृष्णा सम्पन्नक्षीरतमा । अध्वगानां [10]धावन्तः शीघ्रतमा, अध्वगेषु [11]धावन्तः शीघ्रतमाः ॥

## पञ्चमी विभक्ते । (४२/६३९)

यतश्च निर्धारणम् इति वर्तते । [12]षष्ठीसप्तम्यपवादो योगः । विभागः विभक्तम् । यस्मिन् निर्धारणाश्रये विभक्तमस्यास्ति ततः पञ्चमी विभक्तिर्भवति । माथुराः पाटलिपुत्रकेभ्यः [13]सुकुमारतराः, आढ्यतराः ॥

## साधुनिपुणाभ्यामर्चायां सप्तम्यप्रतेः । (४३/६४०)

साधु निपुण इत्येताभ्यां योगेऽर्चायां गम्यमानायां सप्तमी विभक्तिर्भवति, न चेत् प्रतिः प्रयुज्यते । मातरि साधुः । पितरि साधुः । मातरि निपुणः । पितरि निपुणः । अर्चायाम् [14]इति किम्? साधुर्भृत्यो राज्ञः । तत्त्वकथने न [15]भवति । अप्रतेः इति किम्? साधुर्देवदत्तो मातरं प्रति (म.भा. १.४५९) ।

[१३९] अप्रत्यादिभिरिति वक्तव्यम् । (म.भा. १.४५९)

---

1. वाक्यमिदं नास्ति ड, सप्तमी इति वर्तेते ह. 2. पति ड. 3. इदम् इत्यधिकम् ड. 4. व्यापृतः ड.फ. 5–8. पट° ड. 9. निर्धार्यते फ.ग. 10–11. धावन् शीघ्रतमः ड. ह. 12. षष्ठी–सप्तम्योरपवादः ड. 13. आढ्यतराः सुकुमारतराः दर्शनीयतराः क.ह, सुकुमाराः ड. 14. इति नास्ति फ. 15. भवति नास्ति ड.